# .. shrI subrahmaNyabhuja Ngaprayaatastotram 2 ..

## ॥ श्री सुब्रह्मण्यभुजङ्गप्रयातस्तोत्रं २ ॥

भजेहं कुमारं भवानी कुमारं
गलोल्लासिहारं नमस्कृद्विहारं ।
रिपुस्तोमसारं नृसिंहावतारं
सदानिर्विकारं गुहं निर्विचारं ॥ १॥
नमामीशपुत्रं जपाशोण गात्रं
सुरारातिशत्रुं रवीन्द्वग्निनेत्रं ।
महाबर्हिपत्रं शिवास्याब्जमित्रं
प्रभासत्कळत्रं पुराणं पवित्रं ॥ २॥
अनेकार्ककोटि प्रभावज्वलन्तं
मनोहारि माणिक्य भूषोज्वलन्तं
शृतानामभीष्टं सुशान्तं नितान्तं
भजे शण्मुखंतं शरःचन्द्रकान्तं ॥ ३॥
कृपावारि कल्लोलभास्वत्कटाक्षं
विराजन् मनोहारि शोणांबुजाक्षं ।
प्रयोगप्रदान प्रवाहैकदक्षं
भजे कान्तिकान्ताम्बरस्तोममरक्षं ॥ ४॥
सुकस्तूरिका बिन्दुभास्वल्ललाटं
दयापूर्णचित्तं महादेवपुत्रं ।
रवीन्दूल्लसद्रत्न राजत् किरीटं
भजे क्रीडिताकाश गङ्गासुकूटं ॥ ५॥
मुकुन्दप्रसूनावली शोभितान्तं
शरत् पूर्णचन्द्रस्य षटकान्तिकान्तं
शिरीषप्रसूनाभिरामं भवन्तं
भजे देवसेनापतिं वल्लभं तं ॥ ६॥
सुलावण्य सत्सूर्य कोटिप्रकाशं
प्रभुंतारकारिं द्विषड्बाहुमीशं ।
नीजार्कप्रभादीप्यमानाखिलाशं
भजे पार्वती प्राणपुत्रं सुकेशं ॥ ७॥
अजं सर्वलोकप्रियं लोकनाथं
गुहं शूरपत्मादिदंभोलिधारं ।
सुबाहुं सुनासापुटं सच्चरित्रं
भजे कार्तिकेयं सदा बाहुलेयं ॥ ८॥

शरारण्यसंभूतमिन्द्रादिवन्द्यं
द्विषड्बाहुसंख्यायुधश्रेणिरम्यं ।
मरुत्सारथिं कुक्कुटेशं सुकेतुं
भजे योगिहृत् पद्ममध्याधिवासं ॥ ९ ॥
विरिञ्चीन्द्र वल्लीश देवेशमुख्यं
प्रशस्तामरस्तोम संस्तूयमानं ।
दिशत्वं दयालोश्रियं निश्चलांमे
विनात्वांगतिः का प्रभोमे प्रसीद ॥ १० ॥
पदांभोजसेवा समायात बृन्दा
रकश्रेणिकोटीर भास्वल्ललाटं ।
कलत्रोल्लसत् पार्श्वयुग्मं वरेण्यं
भजे देवमाद्यं त्वहीन प्रभावं ॥ ११ ॥
भवांभोधिमध्ये तरङ्गपतन्तं
प्रभोमां सदा पूर्णदृष्ट्या समीक्ष्या ।
भवत्भक्तिनावोद्धर त्वं देव प्रसीद ॥ १२ ॥
करे ज्ञानशक्तिं दरस्मेरमास्ये
कटिन्यस्तपाणिं शिकिस्थं कुमारं
भजेहं गुहादन्य्दैवं नमन्ये ॥ १३ ॥
दयाहीनचित्तं परद्रोहपात्रं
सदा पापशीलं गुरोर्भक्तिहीनं ।
अनन्यावलम्बं भवन्नेत्रपात्रं
कृपाशील मां भो पवित्रं कुरुत्वं ॥ १४ ॥
महासेन गाङ्गेय वल्लीसहाय
प्रभो तारकारे षडास्यामरेश ।
सदा पायसान्न प्रदातर्गुहेति
स्मरिष्यामिभक्त्या सदाहं विभोत्वां ॥ १५ ॥
प्रतापस्य बाहो नमद्वीरबाहो
प्रभो कार्तिकेयेष्टकामप्रदेति
यदा ये पठन्ते भवन्तं तदैव
प्रसन्नस्तु तेषां बहुश्रीं ददासि ॥ १६ ॥
अपारेतिदारिद्र्य पाथोधिमध्ये
भ्रमन्तं जनिग्राह पूर्णे नितान्तं ।
महासेन मामुद्धर त्वं कटाक्षा
वलोकेन किञ्चित् प्रसीद प्रसीद ॥ १७ ॥
स्थिरां देहिभक्तिं भवत्पादपद्मे
श्रियं निश्चलां देहिमह्यं कुमार

गुहं चन्द्रतारं स्ववंशाभिवृद्धिं
    कुरुत्वं प्रभो मे मनः कल्पसाल ॥ १८ ॥
नमस्ते नमस्ते महाशक्तिपाणे
    नम्स्ते नमस्तेलसद्वज्रपाणे ।
नमस्ते नमस्ते कटिन्यस्तपाणे
    नमस्ते नमस्ते सदाभीष्टपाणे ॥ १९ ॥
नमस्ते नमस्ते महाशक्तिधारिन्
    नमस्ते सुराणां महासौख्यदायिन् ।
नमस्ते सदा कुक्कुटेशाख्यकत्वं
    समस्तापराधं विभो मे क्षमस्व ॥ २० ॥
य एको मुनीनां हृदब्जाधिवासः
    शिवाङ्कं समारुह्य सत्पीठकल्पं ।
विरिञ्चाय मन्त्रोपदेशंचकार
    प्रमोदेन सोयं तनोतुश्रियं मे ॥ २१ ॥
यमाहुः परं वेद शूरेषुमुख्यं
    सदायस्यशक्त्या जगत्भीत भीतं ।
यमालोक्य देवाः स्थिरं स्वर्गपालाः
    सदोङ्काररूपं चिदानन्दमीडे ॥ २२ ॥
गुहस्तोत्रमेतत् कृतान्तारि सूनोः
    भुजङ्गप्रयातेन पद्येन कान्तं ।
जना ये पठन्ते सदाते महान्तो
    मनो वाञ्छितं सर्वकामान् लभन्ते ॥ २३ ॥
॥ इति श्री सुब्रह्मण्य भुजङ्गप्रयातस्तोत्रं संपूर्णं ॥

---

Encoded and proofread by antaratma at Safe-mail.net

---

Please send corrections to sanskrit@cheerful.com
Last updated March 16, 2006